RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-21/5379/2014-2016

॥ ओ३म् ॥

विद्वान् प्रशस्यते लोके
विद्वान् गच्छति गौरवम्।
विद्यया लभते सर्वं
विद्या सर्वत्र पूज्यते॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com

मूल्यम्-रू. ५/- द्विवार्षिक शुल्कम्-रू. २४०/-

॥ ओ३म् ॥

रूप यौवन सम्पन्ना
विशाल कुल सम्भवाः।
विद्याहीन न शोभन्ते
निर्गंधा इव किंशुकाः॥

( चाणक्य-नीति )

卐 वर्षम्-५ 卐 अंकः-१६ (११२) 卐 १६ फरवरीमासः २०१६तः २९ फरवरीमासः २०१६ पर्यन्तम् 卐 विक्रमसंवत्-२०७२ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## गङ्गा-स्वच्छता-योजनायां तट-वासि षोडशशत-ग्राम-सहभागिता – उमाभारती

केन्द्रिय-जनसंसाधन-मन्त्रि-उमाभारती कथितवती यत् गङ्गासमीपस्थानि षोडशशत्ग्रामाणि गङ्गा-स्वच्छता-योजनायां




सम्मिल्य निर्मल-गङ्गा-अभियानन्तर्गत् केन्द्र-सर्वकारस्य ग्रामीण-सहभागिता सुनिश्चिता भविता। कार्यक्रमान्तर्गतेऽस्मिन् तानि-ग्रामाणी भूत्वा प्रवहतीं गङ्गा प्रथमेचरणे अक्टूबरमासेन स्वच्छा भविता। एतदनन्तरं द्वितीयं चरणं चतुर्भि वर्षैः पूर्वं भवितम्। अस्यान्तरगते 6000 ग्रामाणि स्वच्छांनि करणीयानि।

नदीतटस्थ-ग्रामाणां ग्रामपंचायतगोष्ठीषु श्रीमति-उमा-भारती उक्तवती यत् प्रथमम् गङ्गा-स्वच्छता-अभियाने ग्रामाणि मेलितुं प्रयासोऽभवत्। ताः कथितवत्यः गतेकोनत्रिंशतवर्षेषु स्वच्छतायाः नाम्नि 4000 इति कोटि-रूप्यकाणि व्यय-कृतानि। तथापि अस्य कोऽपि परिणामः न अभवत्। उमाभारती आश्वासनं दत्तवती यत् गङ्गा-स्वच्छतायै तत्कालिनैः राजग-सर्वकारैः प्रदत्तानि विशंति-कोटि-रुप्यकाणां यदा उपयोगं भविष्यति तदा गङ्गा विश्वस्य दश-शीर्षेषु स्वच्छासु नदीसु सम्मिलेष्यिते। ताः कथितवत्यः-यत् मोदी-सर्वकारः गंगा-तटे ग्रामेषु जैविककृषिः आरंभं कर्तुं योजनायाः विषये विचारितवती। विदितमस्तु यत् नवदेहल्यां स्वच्छ-गङ्गा-ग्रामीण-सहभागितायां आयोजितं राष्ट्रियसमारोहे केन्द्रियमन्त्रिणः उमा भारती, स्मृति-ईरानी-महेशशर्मा-इत्येते एवं उत्तराखण्ड-मुख्यमन्त्रि-हरीश रावतोऽपि सहभागं गृहितवन्तः।

## राममन्दिरनिर्माणाय योगी-आदित्यनाथं मुख्यमन्त्रि-भावयितुं सङ्कल्पः

लखनऊ। गोरखनाथमन्दिरे आयोजिते राष्ट्रिय-संत-चिन्तन-सभायाम् गौरक्ष-पीठाधीश्वर-सांसद-महंत-योगी-आदित्यनाथं अयोध्यायां रामन्दिरनिर्माणारम्भं कारयितुं उत्तरप्रदेशमुख्यमंन्त्रिं भावयितुं



सङ्कल्पोऽभवत्। चिन्तनसभायां श्रीरामजन्मभूम्यां भव्यमन्दिरनिर्माणाय धर्मान्तरणमवरोद्धुं विधिं निर्मातुं समान-नागरिक-संहितां आचरयितुं गोवधे पूर्ण-प्रतिबंधश्च, माता-गङ्गायाः पुनर्प्रतिष्ठादृशः हिन्दू-समाजस्यानेके समस्यानां च तेषां समाधाने चर्चा कृता। चिन्तनगोष्ठ्या अन्तिमे दिने दिगंबर-अखाडा अयोध्या-महन्त-सुरेशदासैः भाजपादलं आह्वनं कृतम् यत् ते मन्दिरनिर्माणायाग्रे आगच्छेयुः। भाजपा-नेतृत्वेन उत्तरप्रदेशे योगी-आदित्यनाथं मुख्यमन्त्रिरूपे प्रस्तुतार्थं याचना कृता। अस्या याचनाया धर्मसभाध्यक्षो गोविन्ददेवगिरि-महामण्डलेश्वर-विश्वेश्वरदास-इत्येतेन सह अनेके सन्तजनाः समर्थनं कुर्वन्तैः श्रीयोगीं सम्मानितं कृतं। सभा-अध्यक्षतां वहन् स्वामि-ज्ञानान्दोऽकथयत् सन्तसभा इति राजनैतिकः मञ्चो नास्ति, तथापि सत्तां वयं निरंकुशः न भवितुं शक्ष्यामः स्यात्, महामण्डलेश्वर-स्वामि-विश्वेश्वरानन्दोऽकथयत् समान-नागरिकसंहिता भारतस्य एकता-अखाण्डतायाः कृते आवश्यकी। दुग्धेश्वनरनाथ-मन्दिर-गाजियाबाद-महंत-महाण्डलेश्वर-नारायण-गिरिः अवदत् यत् ग्रामं ग्रामं सन्तः सामाजिक-समरसतायाः मन्त्रं नीत्वा गच्छेयुः, आभारः ज्ञापन्तं योगि-आदित्यनाथ उक्तवान् यत् सन्तः राष्ट्रजागरणस्य अवयवाः भवन्तु वर्तमान-युगे हिन्दु-समाजरक्षार्थं शस्त्रशास्त्रयोः द्वयोः परम्परयोः वाहकाः भवन्तु इति।

## सुख्याताय संस्कृत-विदुषे आचार्याय डॉ. रवीन्द्र-नागर-वर्याय ऐषमः पद्मश्री-अलङ्करण-प्रदानस्य समुद्घोषणा

-डॉ. बलदेवानन्द-सागरः



नवदेहली। 'हर्ष-प्रकर्षेण साम्प्रतमेतत् संसूच्यते यत् भारतीय-संस्कृत-पत्रकार-सङ्घस्य उपाध्यक्षाय सुख्याताय संस्कृत-विदुषे आचार्याय डॉ.रवीन्द्र-नागर-वर्याय ऐषमः पद्मश्री-अलङ्करण-प्रदानस्य समुद्घोषणा भारतीय-गणतन्त्रदिवसस्यस्य पूर्व-सन्ध्यावसरे भारत-प्रशासनस्य गृह-मन्त्रालयेन विहितास्ति। संस्कृत-वाङ्मयस्य भारतीय-संस्कृतेः संस्कृत-भाषायाश्च देशे विदेशेषु च सुबहु-प्रचारार्थं आचार्य-नागरः 2012-तमे वर्षे राष्टपति-सम्मान-पत्र-प्रदानेन सभाजितः आसीत्। आचार्य-नागरस्य अनामयत्वं दीर्घायुष्यत्वञ्च कामयमानः भा.सं.प.सङ्घः शुभावसरेह्यस्मिन् तं सर्वात्मना वर्धापयति।'

## श्रीसोमनाथ-सौराष्ट्र-संस्कृत-विश्वविद्यालये त्रिदिवसात्मकं अन्ताराष्ट्रियं संस्कृत-सम्मेलनं समायोजितं

-डॉ. बलदेवानन्द-सागरः

गुजरात। श्रीसोमनाथ-सौराष्ट्र-संस्कृत-विश्वविद्यालयेन समायोजितं त्रिदिवसात्मकं [ 7-तः 9-फरवरी 2016 ] अन्ताराष्ट्रियं



संस्कृत-सम्मेलनं गतदिने गुजराते पुण्ये सोमनाथ-ज्योतिर्लिङ्ग-धाम्नि वेरावळ-नगरे पूर्णतां गतम्। संस्कृत-सम्मेलनस्य विषयः आसीत्- 'संस्कृत-वाङ्मये शिवतत्त्वविमर्शः।'

अवसरेह्यस्मिन् देशविदेशेभ्यः सम्प्राप्ताः संस्कृतस्य शोधार्थिनः अध्यापकाः प्राचार्याः सुख्याताः विद्वान्सः संस्कृताभिमानिनश्च समुपस्थिताः आसन्। समुद्घाटन-विधि-विधायकः महामहिमशाली गुजरात-राज्यपालः प्राचार्य-वर्यः डो.ओ.पी.कोहली अद्यतन-जीवने संस्कृत-भाषायाः समधिक-प्रयोग-प्रोत्साहनं समार्थयत्। अस्य अन्ताराष्ट्रिय-संस्कृतसम्मेलनस्य प्रथमे दिने रम्या सहृदय-जनानन्ददायिनी च संस्कृत-कवि-गोष्ठी समुपकल्पितासीत्। अनुदिने सम्पन्ने सांस्कृतिके कार्यक्रमे संस्कृत-भाषा-प्रयोग-विषयकाः मनोरञ्जकाः प्रकल्पाः अनुस्यूताः आसन, येषु संस्कृतान्वितं सामूहिक-गानम्, सामूहिक-लोकनृत्यम्, योगासनाचरणस्य वैविध्याकार-प्रकल्पनम्, हिन्दी-चलचित्र-गानस्य संस्कृतान्तरण-प्रस्तुतिः, एकल-शास्त्रीय-नृत्य-प्रस्तुतयश्च अन्यतमाः आसन्। सर्वाधिका मोददायिका प्रस्तुतिः संस्कृत-प्राध्यापक-त्रयस्य [डो.ललित-पटेलः, डो.दीपेश-कटीरा. डो.अमृत-भागायता च ]

शेषभागःद्वितीयपुटे

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | |
|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुदित मूल्य 50 रु. प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुदित मूल्य 80 रु. प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुदित मूल्य 150 रु. | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

प्रथमपुटस्य शेषभागः **श्रीसोमनाथ-सौराष्ट्र-संस्कृत-विश्वविद्यालये त्रिदिवसात्मकं....**

सूत्रधार-संयोजन-रूपिणी आसीत्।

श्रीसोमनाथ-सौराष्ट्र-संस्कृत-विश्वविद्यालयस्य कुलपतिः प्राचार्यः



अवसरेह्यस्मिन् समुपस्थितेषु संस्कृत-विद्वर्येषु अन्यतमेन महामहोपाध्यायेन आचार्येण शिवजी-उपाध्याय-महोदयेन स्व-रचितम् अभिनन्दन-चित्र-फलकमेकं स्वीय-करकमलाभ्यां समर्प्य अर्कनाथ-चौधरी सस्नेहं सादरञ्च अभिनन्दितः।

संस्कृत-सम्मेलनेह्यस्मिन् आहत्य प्रायेण सार्ध-चतुश्शतं शोधपत्राणि संप्रस्तुतानि ।

# झारखण्डस्य देवघरे संस्कृतविश्वविद्यालयस्थापना

रांच्यां केन्द्रसर्वकारेण झारखण्डस्थे पावने देवघरे संस्कृतविश्वविद्यालय स्थापनाप्रस्तावे सहमतिः प्रकटिता। केन्द्रियमानवसंसाधनमविकासमन्त्री स्मृति' ईरानी-मुख्यमन्त्रिरघुवरदायोः उपस्थितौ देहल्यां प्रस्तावोऽयं पालितः।

अवसरेऽस्मिन् झारखण्डस्य शिक्षामन्त्री डॉ नीरा यादवेन सहानेके पदाधिकारिणः समुपस्थिता अभूवन्। अधिवेशनेऽस्मिन् झारखण्डस्य शिक्षास्तरोन्नयनाय बहवः प्रस्तावाः पालिताः। श्रीरघुवरदासेन कथितं यत् राज्याय अनेके उपहारा केन्द्रसवेकारेण प्रदत्ताः। संस्कृतविश्वविद्यालयस्थापनानन्तरं धनवादस्थिते आईएमसंस्थाने अस्मिन्नेव सत्रे आईआईटीशिक्षणं भविष्यतीत्यपि सूचितम्।

# अष्टवर्षीयां द्रष्टिहीन-जेहरां कण्ठस्था गीता श्लोकाः



अष्टवर्षीया जेहरा द्रष्टिहीना परन्तु सा अलौकिकी बुद्धियुक्ता तस्या हृदयस्य नेत्रे उद्घटिते जेहरा राम-रहीम-कृष्ण-करीम एतेषु भेदः न करोति, जेहरां गीतायाः बहवः श्लोकाः कण्ठस्थाः सन्ति, अस्यां बालिकायां आश्चर्यमयं आत्मविश्वासमस्ति एषा वदति अहं माद्रशानां द्रष्टिहीनानां बालकानां शिक्षयिष्यामि अस्याः पिता रईस-हैदरः माता शहीनश्च जेहरां प्रति स्वाभिमानं दर्शयतिः देहल्यां ढाबा इति भोजनालयं चालयति श्रीरईसस्य त्रीषु अपत्येषु तृतीया इयं जेहरा एषा जेहरा भावेन करबद्धदाञ्जलया गीता-श्लोकान् श्रावयति।

# ‘अनासक्ति-योगः’ इति संस्कृत-ग्रन्थः गुजरातस्य महामहिमशालिना राज्यपालेन डो.ओ.पी.कोहलीवर्येण लोकाय समर्पितः।

डॉ. बलदेवानन्द-सागरः

‘श्रीमद्-भगवद्-गीता’ नाम योगेश्वर-श्रीकृष्णार्जुनसंवाद-रूपः ज्ञानमयः प्रदीपः, भगवता बादरायणेन व्यासेन ‘महाभारते’ प्रज्वाल्य, अशेषमानवतायाः लाभार्थम् उपायनीकृतोह्यस्ति । परमोपकारकमिदं भगवद्-गीतम् आधृत्य अनेकैः विद्वद्भिः भाष्यकारैः चिन्तकैः विचारकैः विश्वनेतृभिश्च काले काले विविधाः टीकाः, विविधानि भाष्याणि च विविधासु भाषासु विरचितानि। तेषु अन्यतमेन राष्ट्रपित्रा महात्मगान्धिना मोहनदास-करमचन्द-गान्धिना ‘अनासक्ति-योगः’ इति स्वीय-जीवनाचरणस्य अनुभवाधारेण विरचितं सरलं सर्वजनोपयोगि च गुजराती-भाषिकं भाष्य-जातमतितरां विलसति



आधुनिके जगति। अधुनावधि गुजराती-भाषिकस्य ‘अनासक्ति-योग’ स्य सार्द्धैक-लक्षाधिक-प्रतयः विक्रीताः जाताः। ततः परं अपरासु अनेकासु भाषासु अनूदितोऽयं ग्रन्थः सुख्यातेन संस्कृत-विदुषा महामहोपाध्येन आचार्येण डो.गौतम-पटेलेन साम्प्रतं संस्कृत-भाषायां अनूदितः, उत्तराखण्ड-विश्वविद्यालयेन च प्रकाशितः। स च ‘अनासक्ति-योगः’ इति संस्कृत-ग्रन्थः अमदावादे राजभवने वैशिष्ट्येन समुपकल्पिते एकस्मिन् समारोहे गुजरातस्य महामहिमशालिना राज्यपालेन डो.ओ.पी.कोहलीवर्येण लोकाय समर्पितः। अवसरेह्यस्मिन् समुपस्थितेषु विशिष्टजनेषु ‘श्रीसोमनाथ--संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो.अर्कनाथ चौधरी, उत्तराखण्ड-विश्वविद्यालयस्य कुलपतिः प्रो.महावीर-अग्रवालः, संस्कृत-सेवा-समितेः संस्थापकाध्यक्षः, महामहोपाध्यायः डो.गौतम-पटेलः, साबरमतीस्थस्य गान्धि-आश्रमस्य सचिवः श्री-अमृतभाई-मोदी चान्यतमाः आसन्।....

# बौद्ध विचारधारायाः हिन्दूत्व-वैरुध्य प्रयोगनुचितम्-डॉ. कोइनाड ऐल्त्स

नवदेहली। बहुधा बौद्ध धर्मस्य विचारधाराया प्रयोगः हिन्दुत्व विचारधारायै एकामस्त्रं रूपेण क्रियते। केचन लेखकाः हिन्दुत्वं समस्यामूलकं मत्वा बौद्धधर्मं तस्य निराकरण्स्य पर्याम् अमन्यन्त। अनुचितोऽयम् वर्तते। विचारोऽयं बेल्जियमस्य हिन्दुवादी चिंतकः प्रखरः लेखकः च डॉ. कोइनाल्ड ऐल्त्स महोदयः नवदेहल्यांमायोजितामेकां संगोष्ठ्यां व्यक्तं कृतवन्तः। संगोष्ठ्यैषा वैदिक धर्मः बौद्धधर्मश्य इत्यस्मिन् विषयोऽपरि आसीत्। अस्या संगोष्ठ्याः आयोजनं वेव्स मानवाभ्युद संस्थानस्य च संयुक्त तत्वावधानेनायोजितम भवत्। डॉ. कोइनाड ऐल्त्स हिन्दू धर्मस्य व्यापकं प्राचीनतमं च कार्यकालं वर्णयन् अकथयत् यत् बौद्धधर्मं हिन्दुत्वस्य पर्याय चिन्तनमतर्कसंगतम्। हिन्दूत्वस्य चिन्तनं वैदिककालं आर्यसमाजं रामकृष्णमिशनस्य च विचाराधाराः स्वान्ते समाहितं सम्पूर्ण भारत वर्षस्य प्रतिनिधित्वं करोति। हिन्दूधर्मं संप्रेषयमाणा प्राचीनतमा भाषा संस्कृतं देशस्य अन्य प्रादेशिक भाषाः सम्पोषितवती। वैदिक संस्कृति भारतीयतायाः परिचायिका वर्तते। सत्यमिदं यत् बौद्धधर्मस्य जैन धर्मस्य च शिक्षाः जातिवादातितरा इच्छाविमुखा शान्तेः मार्गं च प्रशस्तं करोति। परं सामाजिकोत्थाने वैदिकधर्मस्य शिक्षाणाम् सकारात्मक प्रभावं वर्तते।

शेषभागःषष्टमपुटे



# सम्पादकीयम्

## अभिव्यक्तेः स्वतंत्रतायाः इत्युक्ते किम्?

देशस्य राजधान्यां प्रतिष्ठितौ संस्थानौ जवाहरलालनेहरूविश्वविद्यालये प्रैसक्लब ऑफ इण्डिया मध्ये च आततायि अफजलगुरूः मृत्युदण्डदिवसं स्मरणदिवस- रूपेण आयोजितेषु कार्यक्रमेषु देशविरोधि -वक्तव्यैः घोषैश्च पुनरेकबारम् सर्वेषां राष्ट्रवादीनां हृदेयेषु झञ्झावतः आगतः। जे.एन.यू.विश्वविद्यालयः यत्र शिक्षाविद्जनाः च उच्चशिक्षा प्राप्नुवन्तः छात्राः इत्येतद्र्थम् प्रख्यातोऽस्ति, तत्रेव प्रेस-क्लब-ऑफ-इण्डिया- संस्था बुद्धिजीवि-लेखक-पत्रकारणां जनौघाय विख्यातोऽस्ति उच्चादर्शाय प्रस्थापितौ संस्थानौ अधुना एतयोः का स्थितिः एतया घटनया सुस्पष्टमेव यत् जे. एन.यू. वास्तिविके वामपंथीनाम् चरमपंथीनाम् च शरणस्थली अभवत्।

यथैव शरणस्थली कोटिधनानुदाने राष्ट्रविरोधि -गतिविधिषु प्रश्रयते। तथैव प्रेसक्लबमध्येऽपि तान् तथाकथितान् बुद्धिजीविजनान् पश्यामः तेषां विचारधारा सत्तां परितः भ्रमति, ये जनाः अभिव्यक्तेः स्वतत्रतायाः नाम्नि देशद्रोहीकार्ये सन्लग्नाः भवन्ति। पत्रकारिता-शिक्षा-एतयोः मानक-स्तरस्य न काऽपि चिन्ता, स्वार्थाय राजनैतिकमार्गे किमपि कुर्वन्ति यत् कुर्वन्ति तदेव सत्मार्गः, अस्मान् देशस्य दुर्भाग्यमस्ति यत् एतत् सर्वम् देशराजधान्यामेव तदपि संसदभवनं समीपं भवति। सर्वोच्चन्यायलयेन मृत्युदण्डदण्डितस्य देशशत्रोः अफजलगुरोः मृत्युदिवसे आचरणे अभिव्यक्तिस्वतत्रा स्यात् इमाम् परिभाषां देशद्रोहीनां परिभाषां वक्तुं शक्नुमः। अधुना अस्यां घटनायां बहुनां दलानां रूपं स्पष्टमेव यत् के भारतमातुः भक्ताः के च शत्रवः।

आश्चर्यमेव असहिष्णुतायाः ऊपरि पुरस्कारप्राप्तानां समूहेऽधुना कोऽपि पुरस्कारं प्रत्यादाने न आगच्छति।

### लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# पुराणेषु राष्ट्रचिन्तनम्

-हेमन्तकुमारजोशी

सर्वजनैकमत्यमिति संस्कृतवाङ्मयमत्यन्तं व्यापकम्। इदं खलु संस्कृतवाङ्मयं द्वयोर्भागयोर्वि- भज्यते प्रथमस्तत्र वैदिको भागः, द्वितीयश्च लौकिको भागः। यथा वैदिकभागस्य प्रतिनिधिभूताः चत्वारो वेदाः, तद्वल्लौकिकभागस्य प्रतिनिधिभूतानि अष्टादशपुराणानि वरीवर्तन्ते। पुराणानि आर्यावर्तभारतस्य भारतीयसाहित्यस्य च परिचायकानि गौरवभूतानि शास्त्राणि। पुराणाध्ययनं विना न कोऽपि जनः शास्त्रज्ञो भवितुमर्हति। किं नाम पुराणमिति जिज्ञासायां पुरा नाम अनागतम् अतीतं वा, अणं नाम कथितम्, अर्थात् प्राचीने काले यत्कथितं तत्पुराणम्; किञ्च यदपि तत्सर्वं पुराणसंज्ञां लभते ? नैव, पञ्चवस्तुविषये यत्कथितं तत्पुराणसंज्ञयाह्यभिधीयते।

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्।। 1

संस्कृतवाङ्मये खलु पुराणपरम्परेयं विशिष्टं स्थानमधिकरोति। पुराणोपपुराणमहापुराणभेदैर्बहूनां पुराणामुल्लेखो दरीदृश्यते तथापि अष्टादशपुराणानि प्रसिद्धिमवाप्नुवन्ति। महापुराणां सूची देवीभागवते आद्यक्षरैः साङ्केतिकरूपेण समुपलभ्यते। यथाह्यत्र -----------

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते।। 2

वेदेभ्यः परमिमानि अष्टादशपुराणानि विशेषतो हिन्दूसम्प्रदायपथानुगामिनां धर्मनिष्पक्षपवित्र- साहित्येषु स्वतन्त्रं विशिष्टञ्च स्थानमलङ्कुर्वन्ति। महाभारतमिव पुराणसाहित्यस्य पञ्चमवेदत्वेन प्रसिद्धिः। यदा लोकजनैर्वेदार्था नावगतास्तदा हि वेदोक्तार्थस्य ज्ञानं सुलभं कर्तुं पुराणानि प्रणीतानि महर्षिसारस्वतवेदव्यासेन। न केवलं पुराणसाहित्यं हिन्दूविचारधारायाः ऐतिहासिकधार्मिक-दार्शनिकमूल्यबोधं सम्कारयति प्रत्युत सामूहिकदृष्ट्या प्राचीनमध्ययुगीनहिन्दुत्वविचारधारायाः ऐतिहासिकधार्मिकदार्शनिकवैयक्तिकसामाजिकराजनैतिकज्ञानेन समं राष्ट्रियचिन्तनमपि विदधाति। इत्थं सुस्पष्टं भवतीति यत्प्राचीनभारतीयजीवनसंस्कृतिसभ्यतासंस्कारज्ञानविज्ञानधर्मपुरुषार्थादीनां यत्र विस्तरेण सौलभ्येन च विवरणमुपलभ्यते तत्साहित्यमेव पुराणम् इत्युच्यते। जनचित्ताकर्षको तावन्न तु दुरूहवेदमन्त्रः, नैव च स्मृतेः शुष्कश्लोकः यावानाकर्षको भवति पुराणभक्तिसम्पुटितसरससरलश्लोकः। एतत्सिद्धयर्थं नारदीयपुराणे यथा प्रोवाच महर्षिव्यासः-

वेदार्थादधिकं मन्ये पुराणार्थं वरानने।
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः।। 3

वेदेषु राष्ट्रशब्दस्य प्रयोगः देशार्थे राज्यार्थे वा विहितोह्यस्ति । 4,क्वचिच्च स्वराज्योल्लेखोह्यपि सम्प्राप्यते। राष्ट्रशब्दोत्पत्तिः राजृ-धातोः ष्ट्रनप्रत्यययोगेन भवति, यस्य हि सामान्यार्थः- राज्यम्, देशः, साम्राज्यञ्च वरीवर्तते। राष्ट्रस्मभिज्ञातुं तत्र कतिचन व्यापकानिवार्यतत्त्वान्यपि अभिलक्ष्यन्ते, धर्मसंस्कृतिभाषाजनसमाजराजनैतिकविचारादयः प्रामुख्येन । राष्ट्रस्य प्राकृतिकं स्वरूपमपि तावदेव महत्त्वपूर्णं प्रतिभाति यावच्च सामाजिकं स्वरूपम् । विश्वप्राचीनतमसत्साहित्येषु राष्ट्रोद्गारोपेता मनोरमाभिव्यक्तिर्यत्र तत्र स्पष्टं समुपलभ्यते। राष्ट्रशब्दः एकः सुनिर्दिष्टभावनाप्रतीकरूपः।

संस्कृतसाहित्ये संस्कृतपुराणसाहित्ये वा राष्ट्रियचिन्तनाभिधानविषयो न कोह्यप्यभिनवो विषयः, पुराकालदेव राष्ट्रावधारणा बहुधा विलसति नास्त्यत्र सन्देहावकाशः। प्रत्येकमपि पुराणं परमपावना- खण्डभारतेन समं भारतस्थप्रान्तनदीपर्वतसरोवरतीर्थाश्रमनगराणां यथार्थ वर्णनं चकार। राष्ट्रचिन्तनं राष्ट्रैकतया राष्ट्राखण्डतया सम्बन्धितो भवति। स्वीयराष्ट्रस्य प्रत्येकं वस्तुनि स्नेहासक्तिगर्वादिभावना राष्ट्रचिन्तनस्य आवश्यकं तत्वमभिमन्यते। विष्णुपुराणस्य द्वितीयांशे भारतभूमेर्राष्ट्रचिन्तनविषयकं वर्णनं व्यधायि, तृतीयाध्याये भारतभूमेर्विस्तारः, तत्पर्वतारण्यनदीनां, भारतस्य महिम्नो वर्णनमकारि विस्तरेण। इयं खलु पुण्यभूमिः, यस्या गीतानि देवा अपि गायन्ति, उदीरयन्ति च धन्यममीषां जीवनं ये ह्यजायन्त अस्यां परमपावनभारतभूमौ यतोहि एषैव भूमिः स्वर्गमोक्षयोः सौलभ्यमार्गः, कारणमिदं भारतेतरदेशा भोगप्रधानाः, ज्ञानकर्मधर्मार्थकाममोक्षाधारभूमिस्तु केवलं भारतम्। भारतवर्षस्य अखण्डतादेशप्रेमाभिव्यक्तिः विष्णुपुराणे भागवते चातीव सुन्दरपद्येषु संदृश्यत। भारतस्थेमान् गुणान् संस्मृत्य देवा अपि इह पावनभूमौ जनितुमभिलषन्ति भारतीयानां धन्यतागीतानि गायन्ति, यतोहि एषः भारतदेशः स्वर्गमोक्षप्राप्तेः सुखदः पन्थाह्यभिमतो नाना विचक्षणैः। यथोक्तं विष्णुपुराणे-

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते
भवन्तिभूयः पुरुषःसुरत्वात्। 5

श्रीमद्भागवते तु स्वर्गलोके कल्पायोरपेक्षा भारतवर्षे क्षणायुर्लभनं श्रेयस्करम्, यतः कर्मभूम्युपरि विविधानि कर्माणि कृत्वा मानवो भगवन्नारायणस्य सद्य एव अभयामरपदं लभते।

कल्पायुषां स्थानजयात् पुनर्भवात् क्षणायुषां भारतभूजयो वरम्
क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभयं पदं हरेः।। 6

भारतवर्षे जननं देवतानामपि रागद्वेषादिविषयः। देवता भारते जनयितुं सदा प्रतीक्षन्ते भारतवा- सिनाञ्च शोभनानि कर्माणि भूरि भूरि प्रशंसन्ति। एतादृशमेव राष्ट्रविषयकं वर्णनं श्रीमद्भागवतेह्यपि समुपलभ्यते, तत्र भगवान् मुकुन्दः श्रीकृष्णः प्रोवाच अहो ! तेषां जीवनं शोभनम् अत्र जनयितुं त्वयं मुकुन्दोऽपि स्पृहयति तत्र श्रीमद्भागवते यथाह्यवाप्यते भातरवर्षस्य सन्दर्भे-

अहो ! अमीषां किमकारि शोभनम्
प्रसन्न एषां स्विदुतस्वयं हरिः।
यैर्जन्म लब्धं नृषुभारताजिरे
मुकुन्द सेवौपायिकं स्पृहा हि नः।। 7

निश्चित्कालावधिपर्यन्तं स्वर्गस्थितिर्भवतीति शास्त्रनिदर्शनम् । तद्धेतोः स्वर्गस्था देवा अपि चिन्तयमाना भवन्ति यदस्माकं कार्यसमाप्तिपरं पुनर्जन्म कुत्र सम्भविष्यति ? विष्णुपुराणेनानुमीयते यदेते पुनर्जनितुं भारतमेव कामयन्ते, यतोह्यहि अमी कथयाञ्चक्रुः धन्यास्ते मनुष्याः-

जामिमनैतत्क्व वयं विलीने स्वर्गप्रदे कर्मणि देहबन्धनम् ।
भवन्ति धन्याः खलु ते मनुष्याः ये भारते नेन्द्रियविप्रहीनाः।। 8

प्रसङ्गोह्ययं भारतं एतादृक्पुण्यभूमिरूपे प्रतिष्ठापयति यः स्वर्गस्य आधारो वरीवर्ति । यत्र विधेयकर्माणि सम्पादयितुं सुलभावसरा विद्यन्ते तदनुगुणमसौ मुक्तिमवाप्नोति। विष्णुपुराणे एदमपि स्पष्टं विवेचितं यत्स्वर्गमोक्षदात्री कर्मभूमिः भारतमतिरिच्य क्वापि न विद्योतते। यथाह्यत्र-

इतः स्वर्गश्च मोक्षश्च मध्यं चान्तश्च गम्यते।
न खल्वन्यत्र मर्त्यानां कर्मभूमौ विधीयते।। 9

पूजावसरे धार्मिककृत्यविधानप्रसङ्गेह्यपि राष्ट्रियं चिन्तनमभिव्यक्तमस्ति। पूजाह्यदौ संकल्पविधानस्य किमिदं रहस्यम् ? संकल्पावसरे प्रत्येकम् उपासकः स्वीयसमक्षमखण्डभारतस्य भौगोलिकं चित्रं प्रस्तौति। सः स्नानदानसंकल्पवाक्ये देशकालकर्तृकर्माणि चत्वारि इमानि संयुज्य स्वात्मना बृहत्तरभारतस्य प्राणिरूपे गौरवमनुभवति। असौ जानीते यद् यस्मिन् काशीस्थभागीरथ्यां स्नानं कुरुते तज्जम्बूद्वीपस्य भरतखण्डान्तर्गते , भारतवर्षस्य कुमारिका- खण्डान्तर्गते च विद्यमानं तीर्थं विद्यते। गुप्तकाले भारतवर्षं कुमारद्वीपसंज्ञयाह्यभिधत्ते स्म, यतोहि भारतवर्षं दक्षिणक्षेत्रे कन्याकुमारीतः उत्तरक्षेत्रे गंगोद्गमस्थानं यावल्लम्बमानं मन्यते स्म-

आयामस्तु कुमारीतो गंगायाः प्रवहावधिः। 10

स्नानकाले स्नानार्थी भारतस्य सप्तसिन्धून् स्नानीयजले आह्वाहनाय प्रार्थयते तत्काले तस्य मानसपटले भारतस्य अखण्डरूपं प्रस्तुतं भवति। स्मरन्-

गङ्गे च यमुने चैव गोदावरिसरस्वति !।
नर्मदे सिन्धु कावेरि जलेह्यस्मिन् सन्निधिं कुरु।।

वस्तुतो राष्ट्रमिदम्एकं भूखण्डं नास्ति प्रत्युत भारतीयानाम् आत्मा वर्तते। अत्रत्याः निवासिनो भारतस्य सन्ततयः सन्ति। भारतमेतद् उत्तरदिशि हिमालयं यावद् दक्षिणदिशि च हिन्दमहासागरपर्यन्तं विस्तीर्णं वर्तते, नवसहस्त्रयोजनपरिमितो विस्तारोह्यस्य। तथा हि

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः।।
नवयोजनं सहस्त्रो विस्तारोह्यस्य महामुने ! । 11

एतस्या भूमेरिदमपि वैशिष्ट्यं यदत्र जना फलेच्छां विना कर्माणि कुर्वन्ति, तानि च कर्माणि सर्वव्यापिपरमात्मने समर्प्य कर्मभूमिमिमां सम्प्राप्य सच्चरित्रवान् भूत्वा परमात्मनि लीयन्ते। एवम्

कर्माण्यसंकल्पिततत्फलानि सन्यस्य विष्णोः परमात्मभूते।
अवाप्य तां कर्ममहीमनन्ते तस्मिंल्लयं ये त्वमत्वाः प्रयान्ति।। 12

एवं हि भारतभूमिः भूखण्डमात्रं नापितु महानीयोदात्तचिन्तनदर्शनम्, पुन्यात्मनां संसर्गश्चैतस्याः वैशिष्ट्यम्, येन मानवा आध्यात्मिकोन्नतिं विधातुं सुतरां प्रभवन्ति। भारतसमः पृथिव्या न कोऽपि देशो विद्यते, निखिले भूमण्डलेह्यनुपमोह्यद्वितीयोश्चायं देशः। कर्मधर्मपुण्यभूमिर्भारतं भारतेतरदेशास्तु भोगभूमित्वेन लोकप्रसिद्धाः। भारतं कर्मभूमिः भोगभूमिर्वा तथ्यानामेतेषां परिपुष्ट्यै पुराणेषु महत्वपूर्णा विचाराः पदे पदे उपलभ्यन्ते ।

* पृथिव्यां भारतं वर्षं तीर्थं त्रैलोक्यविश्रुतम्।13
* पृथिव्यां भारतं वर्षं कर्मभूमिरुदाहृतम् ।14
* अभिसम्पूजितं यस्माद् भारतं बहुपुण्यप्रदम् ।
कर्मभूमिरतो देवैर्वर्षं तस्मात् प्रकीर्तितम् ।। 15
* कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम् । 16
* भारतं नाम यद्वर्षं दक्षिणेन मयोदितम् ।
तत्कर्मभूमिर्नान्यत्र सम्प्राप्तिः पुण्यपापयोः।।
एतत्प्रधानं विज्ञेयं यत्र सर्वं प्रतिष्ठितम् ।। 17
* प्रयाति कर्मभूर्ब्रह्मन् नान्यलोकेषु विद्यते। 18

एतदनुगुणं देवीभागवतपुराणे क्रमेण राष्ट्रशक्तिः, आत्मशक्तिः, परमात्मशक्तिश्चैतत्शक्तित्रयं विकसनीयम्, सममेव राष्ट्रैक्यस्थापना भवितुमर्हति। प्राचीनकालादेव मानवेन स्वजन्मभूमौ मातृशक्तिकल्पनाह्यनुकृता वर्तते, अत एव जन्मभूमिः

शेषभागःषष्टमपुटे

# वैदिकं पर्यावरणविज्ञानम्

-डॉ. सुन्दरनारायणझाः
-सहायक आचार्यः, वेदविभागः,
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत
विद्यापीठम्,नवदेहली-१६

भारतीयज्ञानगंगायाः स्रोतांसि वेदा एव सन्ति। समस्तान्यपि ज्ञानविज्ञानानि वेदादेव प्रसृतानि। ज्ञानात्मकाद्विद्धातोः विनिर्मितस्य वेद इति पदस्यार्थोऽपि ज्ञानमेव भवति। तस्माद्वेदानां विषये मनुराह-''**सर्वज्ञानमयो हि सः**''[1] इति। स्वरूपभेदाद्वेदास्त्रिविधाः संहिताभेदाच्च चत्वारो वेदाः सन्ति प्रख्याताः। गतेषु कालेषु शाखाप्रशाखादिभिर्बहुत्वमापन्नाः। तैत्तिरीयब्राह्मणे-''**अनन्ता वै वेदाः**''[2] इत्युक्तमस्ति। तेनेदं प्रतीयते यज्ज्ञानस्यानन्त्याद्वेदानामप्यानन्त्यं साधितम्। अत इदं सुव्यक्तं भवति यद्वेदाः विश्वस्य समस्तस्यापि ज्ञानविज्ञानस्यानन्तभाण्डागारास्सन्ति।

ज्ञानविज्ञानयोः स्वरूपमुपवर्णयता प्रोक्तममरकोशकारेण-''**मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः**''[3] इति। अनेन कथनेन शिल्पशास्त्राणां विज्ञानमयत्वं व्यवस्थापितम्। श्रौतग्रन्थेषु शिल्पविषय एवमुक्तमस्ति यत्- ''**आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति**''[4] इत्यनेन कथनेन आत्मनः संस्कारो येन विधिना भवति तच्छिल्पमित्युच्यते। आत्मनः स्वरूपमुद्घाटयता ऐतरेयेणोक्तम्-''**यावती वै द्यावापृथिवी तावानात्मा**''[4] इति। अर्थात् द्युलोकादारभ्य पृथिवीलोकपर्यन्तं यावन्ति तत्त्वान्यस्माकम्परितो विद्यमानानि सन्ति तानि सर्वाणि आत्मबोधकान्येव। एषामस्माकम्परितो विद्यमानानां तत्त्वानामेव नामान्तरं पर्यावरणमिति।

पर्यावरणशब्दो पाणिनीयव्याकरणस्य ''**परि+आङ्-उपसर्गपूर्वकाद् वृञवरणे धातोः ल्युट् प्रत्यये कृते निष्पन्नो भवति।**'' यस्यार्थो भवति परितो विद्यमानं यदावरणं तत्पर्यावरणमिति। आवरणशक्तिपदव्याख्याने शब्दकल्पद्रुमे वेदान्तोपदिष्टं वाक्यं प्रस्तुतम्। तद्यथा-''**स्वल्पोऽपि मेघो बहुयोजनविस्तीर्णमादित्यमण्डलमवलोक-यितृजननयनपथपिधायकतयाच्छादयतीव तथैवाज्ञानं परिच्छिन्नमपि आत्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकयाच्छादयतीव तादृशं सामर्थ्यम्**''[6] इति। अत इदं स्फुटं यदस्माकम्परितो विद्यमानानि समस्तान्यप्यावरकातत्त्वानि स्थूलसूक्ष्मरूपाणि च पर्यावरणमिति।

वेदेषु पर्यावरण-संरक्षणविषये बह्व्यः सामग्र्यो मिलन्ति। पृथ्वीजलवाय्वाकाशस्य च शोधनाय, प्रदूषणाद्रक्षणाय चानेकेषु मन्त्रेषु निर्देशाः मिलन्ति। तत्रापि विशेषरूपेण पर्यावरणस्य संघटकतत्त्वानि कानि?, विश्वस्य संरक्षकानि कानि तत्तवानि?, पर्यावरणस्य शोधनं कथं भवितुमर्हति? पर्यावरणसंरक्षणस्य च के विधयः सन्तीत्यादीनां विषयाणामुपरि ये सन्दर्भाः प्राप्यन्ते तेषामत्र संक्षेपेण विवेचनानि प्रस्तूयन्ते।

पर्यावरणे मुख्यतया त्रीणि मण्डलानि **वायुमण्डल-स्थलमण्डल-जलमण्डलानीति।** तत्रोपस्थितानि समस्तान्यपि भौतिकानि रासायनिकानि च तत्त्वानि सम्मिलितानि भवन्ति। एकमुक्तप्रकारेण पर्यावरणं भौतिक-जैविकतत्तवयोः सम्मेलनेन विनिर्मितमिति विज्ञायते। तत्र भौतिकपर्यावरणे मृज्जलवायुतापप्रकाशदीनि तत्त्वानि, जैविकपर्यावरणे समस्तजीवजगद्वृक्षादीनि चागच्छन्ति। एभिरेव स्थलमण्डलं जलमण्डलं वायुमण्डलं च विनिर्मितम्भवति।

स्थलमण्डले पर्वत-सिकता-मृत्तिका-धातवश्च मुख्याः, जलमण्डले समुद्र-नदी-तटाक-निर्झर-कूपादीनि जलीयस्रोतांसि च समाविष्टानि, वायुमण्डलं त्वगणितमेव तत्र विशेषेण ऑक्सीजन-हाइड्रोजन-नाइट्रोजन-कार्बनडाईआक्साइडेत्यादीनां समावेशो दृश्यते।

सर्वेऽपि जीवाः स्थलमण्डलाद् भोजनं, जलमण्डलाद्रसं, वायुमण्डलाच्च प्राणवायुमाप्नुवन्ति। अथर्ववेदानुसारं जलं वायुरौषधं चैतानि त्रीणि पर्यावरणस्य मुख्यसंघटकतत्तवानि वर्तन्ते। यथा-

''**त्रीणि च्छदांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम्। आपो वाता ओषधयस्तान्येकस्मिन् भुवन अर्पितानि।।**[7] **इति।**

मन्त्रेऽस्मिन् **आपो वाता ओषधय** इत्युक्त्वेदं निर्दिष्टं यत्पर्यावरणस्य रक्षायै उपर्युक्तानां घटकतत्त्वानां संरक्षणमावशयकम्। यद्यपि लोके साधारणतया एतदेव ज्ञायते स्म यज्जलवायु एव पर्यावरणस्य प्रमुखघटकौ स्तः। परन्त्वसिमन् मन्त्रे स्पष्टतया औषधयोऽपि पर्यावरणस्य प्रमुखघटकत्वेन प्रस्तुताः सन्ति। यथा जलवायूभ्यां विना जीवनमसम्भवम्, तथैव वृक्ष-वनस्पतीनामभावे जीवनस्यास्तित्वमसम्भवमेवास्ति। एतस्मादेव कारणादेषां घटकतत्त्वानामत्र 'छन्दः' 'पुरुरूपम्' च द्विविधं नाम निर्दिष्टम्। छन्दांसि छादनात् अर्थाद्यत्सर्वाणि भूतान्याच्छादयति तच्छन्दः, बहुरूपाणि यस्य तत्पुरुरूपम्।

अर्थात्पर्यावरणमिदमनेकरूपेणावस्थाय सर्वाण्याच्छादयतीति। एवमुक्तप्रकारेणेदं सुस्पष्टं यद्यथा लोके माता पुत्रान् परितः पालयति तथैवेदं पर्यावरणमस्मानिति। अत्र सर्वप्रथमं पर्यावरण-प्रदूषणविषये तावत्किञ्चिद्विचार्यते।

## पर्यावरण-प्रदूषणम्

मानवानां क्रियाकलापेभ्यः समुत्पन्नावशिष्टोत्पादरूपेषु पदार्थानामूर्जाशक्तीनाञ्च विमोचनेन प्राकृतिकपर्यावरणे भूयमानानि हानिकारकपरिवर्तनानि प्रदूषणमित्येतेन नाम्ना ज्ञायते। प्रदूषणमेतन्मनुष्यैः पर्यावरणे समुत्पादिताभ्य असन्तुलितस्थितिभ्य एवोत्पद्यते। तत्र तत्र मुख्यानि प्रदूषणानीमानि सन्ति-

**(1) वायुप्रदूषणम् (2) जलप्रदूषणम (3) भूमिप्रदूषणम् (4) ध्वनिप्रदूषणम् (5) रेडियोधर्मीप्रदूषणञ्च।** क्रमशोऽत्र समेषामपि प्रदूषणानां कारणानि संक्षेपेण प्रस्तूयन्ते, तदनन्तरं वेदेषु निर्दिष्टानां पर्यावरणसंरक्षणोपायानां विषये चिन्तनं प्रस्तोष्यते।

## (1) वायुप्रदूषणम्

विदितमेवास्ति यद्वायुमण्डलमस्माकं जीवनायावश्यकानि गैसपदार्थानि प्रदाय दिवारात्र्योस्तापमाने यदन्तरम्भवितव्यं तदन्तरं सम्यक्तया व्यवस्थाप्य ध्वनितरङ्गेभ्यः समुचितं माध्यमं प्रददाति।

### वायुप्रदूषणस्य कारणम्

(क) **दहनम्-** धूम्रशकटयानेषु, मोटरयानेषु, बसट्रककारादिषु च डीजल-पेट्रोल कोयलाऽऽदीनामिन्धनानां प्रज्ज्वलनेन यानि धूमादिविषाक्तगैसपदार्थान्युत्पद्यन्ते तानि वातावरणं प्रदूषयन्ति।

(ख) **रासायनिकमुत्पादस्थलम्-**उद्योगस्थलेषु तैलपेट्रोलडीजलादीनां शोधनम् सीमेंटद्योगस्थलाद्धूलकणानां विषाक्तगैससादिपदार्थानामुत्सर्जनं नित्यं प्रति भवत्येव, तान्युत्सृष्टानि पदार्थाति वायुमण्डले सम्मिलितानि भूत्वा वायुं प्रदूषयन्ति।

(ग) **रेडियोधर्मीपदार्थस्योत्पादनम्-**परमाणुपरीक्षणविस्फोटादिभिरनेक-विधरेडियोधर्मिपदार्थानामुत्पादनं तु स्वाभाविकमेव भवति, ते च पदार्थाः वायुमण्डलम्प्रदूषयन्ति।

### वायुप्रदूषणस्य प्रभावः

मानवानां चिन्तनशक्तौ हृदयचक्षुउदरयकृतादिषु रोगोत्पत्तिः। खाद्यान्नसंकटोत्पत्तिः, हरितगृहप्रभावात् तापमानस्य वृद्धिः, जलवायोरुपरि सम्यक् प्रभावः, ओजोनक्षयः, अम्लीयवृष्टिरित्यनेकविधप्रभावो भवितुमर्हति।

## (2) जलप्रदूषणम्

विदन्त्येव भवन्तस्सर्वे यज्जलं जीवनस्य प्रमुखं साधनमस्ति। जलं विना जीवनमसम्भवमेव। ''**आपोऽस्मान्मातरः**''[8] इत्यस्मिन् मन्त्रवाक्ये अपां मातृरूपत्वं संकेतितम्। भूगोलशास्त्रे स्पष्टमिदमुक्तं यदस्य स्थलमण्डलस्य त्रिषु भागेषु जलमस्ति, एकस्मिन्नेव भागे पृथ्वीति। अर्थादिदं सुस्पष्टं यत्समस्तस्यापि रसतत्त्वस्य केंद्रं स्थलमण्डलस्थितं जलमेवास्तीति। तस्माज्जलन्त्वतीव महत्त्वपूर्णमेवास्ति।

### जलप्रदूषणस्य कारणम्

(क) **वाहितं मलम्-**औद्योगिकस्थलेभ्यः गृहेभ्यः गोशालाभ्यश्च मलयुक्तं जलं नदीषु प्रवाहितं भवति। तेन नदीनां जलं दूषित भवति। **(ख) कीटनाशकपदार्थानां प्रयोगः-** कृष्यादिकार्देषु कीटनाशकपदार्थनां डी.टी.टी. इत्यादीनां रासायनिकतत्त्वानां बहुलप्रयोगों भवति, वर्षाजलेन सह तत्तत्त्वं मिश्रीभूय नदीषु तटाकेषु च गच्छन्ति तेन तत्रत्यं जलं दूषितं भवति **(ग) बहिःस्रावः-**अपषिष्टपदार्थरूपेण गृह्यं मलं नलिकासु प्रवाहिन्त, तत्र विद्यमानं मलिनं जलं जलस्रोतस्सु मिलन्ति, तेन बहिःस्रावेण जलं दूषितं भवति। **(घ) रेडियोधर्मिपदार्थानां मिश्रणम्-रेडियो**-एक्टिवापाशिष्टेन रेडियोधर्मिपदार्थानां भूमिस्थे जले प्रवेशो भवति। तेन भूमिस्थं जलं प्रदुष्टं भवति। तच्च दूषितं जलं प्राणिनां भोजने मिश्रितं भूत्वा विपरीतं प्रभावमुत्पादयति।

### जलप्रदूषणस्य प्रभावः

प्रदूषितजलपानेन विविधवैक्टीरियाजनिताः वाइरसजनिताश्च रोगाः टाइफाइड-पेचिस-पीलियादवः समुत्पद्यन्ते। जलीयजीवजन्तूनां वनस्पतीनाञ्चोपरि प्रतिकूलप्रभावो भवति। प्रदूषितजलस्योपभोगेन सर्वेऽपि जीवाः प्रभाविता भवन्ति।

### भूमिप्रदूषणम्

''**माता भूमिः पुत्रोऽहं पृथिव्याः**''[9] इत्यथर्ववेदोक्तमन्त्रेण

भूमेर्महत्त्वं न कस्याप्यविदितम्। सर्वेषामपि **जीवजन्तूनामाधार-भूतेयमत्यन्तपरिवर्तनशीलकारिकाऽस्ति।** चतुरशीतिलक्षसंख्यकानां मनुष्यपशुपक्षिकृमिकीटपतङ्गलतागुल्मवृक्षवनस्पत्यन्नौषध्यादीनां जीवनां मुख्यमवलम्बनं भूमिरेव।

### भूमिप्रदूषणस्य कारणम्

(क) **आवश्यकतावृद्धिः-** मानवानामावश्यकताः नित्यं प्रति वर्धमानाः सन्ति। एतस्मात् कारणात् भूमेः सकाशादधिकाधिकलाभवाञ्छया मानवैः सततं प्रत्यत्नो विधीयते। कृषावुन्नत्यर्थ रासायिनकपदार्थानां बहुलप्रयोगः क्रियते, तेन भूमेरूर्वराशक्तिः शनैः शनैः क्षीणताम्प्रति गच्छति।

(ख) **रासायिनिकपदार्थनामुप्रयोगः-** सामान्यत एवं दृश्यते यत्कृषकाः कीटादिभिः सस्यानां संरक्षणायानेकविध कीटनाशक-रासायनिकपदार्थानामुपयोगं प्रचुरेण कुर्वन्ति, तेन भूमौ क्षारीयगुणस्य वृद्धिर्जायत एवं। फलतः कीटनाशकरसायनं धूमिकणमाध्यमेनास्माकं शरीरे प्रविशन्ति येनानेकविधरोगा उत्पन्ना भवन्ति।

### भूमिप्रदूषणस्य प्रभावः

भूमिप्रदूषणेनानेकविधहानिस्संभवति यथा-भूमौ ऊर्वराशक्तेरभावः पेचिस-दमा-क्षयादीनां रोगानामुत्पत्तिः, सस्योत्पादने ह्रासः ऊसरतायाः विकास इत्यादयः।

उपर्युक्तानां सर्वविधप्रदूषणानां नियन्त्रणमावश्यकम्। नियन्त्रणाभावे प्रदूषणे वृद्धिस्तु स्वाभाविकी एव, तस्मान्नियन्त्रणायोपायाश्चिन्तयितव्याः। प्रदूषणनियन्त्रणमस्य मुख्योपायेषु प्रथम अन्तिमश्चोपायस्त्वयमेव यद्यस्मात् स्थानात् प्रदूषणस्योत्पतिर्भवति तस्य स्थानस्य संरक्षणं कर्त्तव्यम् एतस्मिन् विषये वैदिकं यच्चिन्तनं तदहमत्र संक्षेपेण प्रस्तौमि।

### वायुसंरक्षणम

वायुर्मानवजीवनस्याधारोऽस्ति। जीवनरक्षायै वायुप्रदूषणस्य समस्ततत्त्वानां वियन्त्रणमावश्यकमस्ति। ''**युवं वायो सविता च भुवनानि रक्षथः**''[10] मन्त्रेऽस्मिन् वायुसूर्ययोः महत्त्वमुपपादयन्नुक्तं यद्युवामन्ततरिक्षे व्याप्तौ संसारस्य रक्षकौ सर्वविधरोगानाञ्च हन्तारौ स्तः। वायोर्गुणद्वयस्य वर्णनं यथा- ''**आ वात वाहि भेषजं वि वात वाहि यद् रपः। त्वं हि विश्वभेषज देवानां दूत ईयसे।।**''[11] अर्थाद्वायुः प्राणवायुना जीवेषु जीवनीशक्तिं सञ्चारयति, अपानवायुना च शरीरात्सर्वान् दोषान् बहिर्निष्कासयति। अत एव वायोरपरं नाम विश्वभेषज इत्यस्ति। ऋग्वेदयैकस्मिन् मन्त्रे ''**यददो वात ते गृह अमृतस्य निधिर्हितः। तेन ना देहि जीवसे।।**[12] उक्तमस्ति यद्वायौ अमृतस्याकरो वर्तते। जीवनीशक्तेर्दाता, संसारस्य पिता, भ्राता, मित्रं रोगानामौषधिश्च वायुरेवास्ति। अपरिस्मन्मन्त्रे पर्यावरणशोधकत्वेन वायोर्वर्णनमस्ति। यथा-''**ये पर्वताः सोमपृष्ठा आप उत्तानशीवरीः। वातः प्रदूषणं विनाशयन्ति।**[13] ऋग्वेदस्य दशमण्डलस्य विभिन्नेषु सूक्तेषु द्यावापृथिवी, जलम्, औषधिः, वायुः, मेघः, नदीः, पर्वतः, वनम्, सूर्यः, उषाः अग्निश्च पर्यावरणस्य शोधकतत्वरूपेण स्तुताः सन्ति।

## जलसंरक्षणम्

बेदेषु जलस्योपयोगित्वं महत्तवञ्च भूरि वर्णितम्। जलं जीवनमस्ति, अमृतमस्ति, भेषजमस्ति, रोगनाशकमस्ति, आयुवर्धकञ्चास्तीत्युकतम्। यथा-''**आपश्च विश्वभेषजीः**''[14] **अप्स्वन्तरमृतम् अप्सु भेषजम्**''[15] ''**आपो विश्वस्य भेषजीः, तास्त्वा मुञ्चन्तु क्षेत्रियात्**''[16] **वातोगन्धर्वः, तस्यापौ अप्सरस ऊर्जो नाम**''[17] इत्यादिषु मन्त्रेषु जलस्य गुणाः वर्णिता। ऋग्वेदस्यैकस्मिन् मन्त्रे उक्तं यत्-''**आप ओषधीरुत नोऽवन्तु, द्यौर्वना गिरयो वृक्षकेशाः।।**[18] इति। अर्थान्मानवानां रक्षकेषु जलम्, औषधिः, वनं, वृक्षः, पर्वतः, द्युलोकश्च महत्त्वपूर्णाः सन्ति। अनेन स्पष्टं यदेतेषां पदार्थानां संरक्षणेनैव वयं स्वात्मसंरक्षणं कर्तुं शक्नुमः। एषां हानिः स्वात्मनो हानिरिति। यजुर्वेदेऽपि च - ''**माऽपो हिंसीः, मा ओषधीर्हिंसीः।**''[19] **अपः पिन्व, औषधीर्जिन्व।।**[20] मन्त्रेऽस्मिन् स्पष्टनिर्देशो वर्तते यज्जलं ओषधिश्च न हिंसितव्यौ, जलसिञ्चनेनौषधीनां संरक्षणं विधातव्यम्। जलौषधयोश्च संरक्षणेनैवास्माकं संरक्षणं सम्भवति। तस्मात्सर्वविधयत्नेनैतेषां संरक्षणं कर्त्तव्यम्।

### वृक्ष-वनस्पति-संरक्षणम्

वेदेषु ब्राह्मणग्रन्थेषु च वृक्षवनस्पतीनां महत्त्वपूर्णं वर्णनमस्ति। यथा-''**वनस्पतिः सह देवैर्न आगन्, रक्षः पिशाचन् अपबाधमानः।।**[21] अर्थात् वृक्षेषु देवतानां निवासो भवति। ते प्रदूषणरूपान् राक्षस-पिशाचान् विनाशयन्तीति। ब्राह्मणग्रन्थेषु-''**प्राणो वै वनस्पतिः**''[22] इत्यत्र प्राणरूपत्वमुक्तम्। शतपथश्रुतौ- ''**ओषं धयेति तत ओषधयः समभवन्।**''[23] तथा च ''**ओषधयो वे पशुपतिः**''[24] अर्थादोषधयो दोषान् समापयन्ति। दोषशमन कृत्वा पशूनां (जीवानां) पालनं कुर्वन्ति, तस्मादेते पशुपतिरित्युच्यन्ते। यजुर्वेदेऽपि च ''**नमो वृक्षेभ्यो हरिकेशेभ्यः। क्षेत्राणां पतये नमः। वनानां पतये नमः। वुक्षाणां पतये नमः। ओषधीनां पतये नमः। कक्षाणां पतये नमः।**[25] इत्यादिषु मन्त्रेषु वृक्षवनस्पतीनां शिवरूपत्वं सुवर्णितम्। अत इमे शिवरूपेणैव पूज्याः सन्ति।

### द्यावापृथिव्योः संरक्षणम्

परमात्मना बहवः महत्त्वपूर्णाः पदार्थाः उपहाररूपेण प्रदत्ताः। तेष्वियं पृथिवी अप्येका। पृथिव्यामस्यामक्षयधनभण्डारो वर्तते। अस्य भण्डारस्य संरक्षणं द्युलोकः, वृक्षवनस्पतयः, जलम्, नद्यः, वनानि च कुर्वन्ति। पृथ्वीलोकदारभ्य द्युलोकपर्यन्तमेवास्माकं सर्वस्वमस्ति। यतस्तु त्रय एव लोकाः सन्ति-पृथिवीलोकः, अन्तरिक्षलोकः, द्युलोकश्च।

शेषभागःषष्टमपुटे

पंचमपुटस्य शेषभागः

## वैदिकं पर्यावरणविज्ञानम्..........

एषां त्रयाणामपि लोकानां समावेशो द्यावापृथिव्योर्मध्य एवास्ति। तस्माद्यजुर्वेदे-''**पृथिवी माता द्यौष्पिता**''[26] इत्युक्तम्। अथर्वे च- ''**भूमिर्माता भ्रातान्तरिक्षम्द्यौर्नः पिता।**[27] अर्थाभ्द्रूलोकोऽस्माकं माता, अन्तरिक्षलोको भ्राता, द्युलोकश्च पिताऽस्ति। एवमुक्तप्रकारेणेदं सिध्यति यदेतेषा संरक्षणेनैवास्माकं जीवनं सुरक्षितं भवितुमर्हति। तदुक्तं वेदे-''**द्यौः शान्तिरन्तरिक्षथंशान्तिः शान्तिरेव शान्तिः समाशान्तिरेधि।।**[28]

इत्यनेन याजुषमन्त्रेणेदं स्फुटं विज्ञातं भवति यद्विशुद्धे पर्यावरणे सत्यस्माकं जीवनं सुरक्षितं भवितुमर्हति। तद्यथोक्तं वेदे-

''**पूर्वीरस्य निष्षिधो मर्त्येषु पुरू वसूनि पृथिवी विभर्ति।**
**इन्द्राय द्याव ओषधीरुतापो रयिं रक्षन्ति जीरयो वनानि।।**[29] इति।

एतैरुदाहरणैदिं सुस्पष्टं यद्यत्र पर्यावरणं शुद्धं भवति तत्र मनुष्य-पशु-पक्षि-कृमि-कीट-लता-गुल्म-वृक्ष-वनस्पत्यौषध्यादयश्च सुखेन जीवनं यापयन्ति। तदुक्तमथर्वे-

''**सर्वो वै तत्र जीवति गौरश्वः पुरुष पशुः।**
**यत्रेदं ब्रह्म क्रियते परिधिर्जीवनाय कम्।।**''[30]

इत्यस्मिन्मन्त्रे ब्रह्मशब्देन यज्ञ-यागादीनामुल्लेखो वर्तते। योऽयं यज्ञः प्रकृतौ (द्यावापृथिव्यां) निरन्तरं स्वाभाविकतया प्रचलित स प्राकृतः। तस्यैव प्राकृतयज्ञस्यानुकरणमत्र मानवैः क्रियते तस्मादयं यज्ञः कृत्रिम इत्युच्यते। अत इदं शक्यते वक्तुं यद्यज्ञेन प्रदूषण-समस्यायाः समाधानं भवितुमर्हति।

**यज्ञः, प्रदूषणसमस्यायाः सर्वोत्तमं समाधानम्**

चतुर्ष्वपि बेदेषु यज्ञस्य महत्त्वपूर्णं वर्णनमस्ति। तस्य कारणमिदमस्ति यद्यज्ञ एव स विधिर्येन प्राकृतिकं सन्तुलनं स्थापयितुं शक्यते। यज्ञेन पर्यावरणसंरक्षणं, वायुमण्डलशोधनं, विविधरोगविनाशः, शारीरिकी मानसिकी चोन्नतिः, रोगनिवारणेन दीर्घायुष्प्राप्तिश्च सम्भवति। यज्ञेन भूप्रदूषणं, जलप्रदूषणं, वायुप्रदूषणं, ध्वनिप्रदूषणञ्च विरोधयितुं शक्यते। एतस्मादेव कारणाद्वेदेषु यज्ञ-यागादीनां वर्णनं महत्त्वपूर्णेन विधिना कृतमस्ति।

वस्तुतः प्रकृतावेका चक्रव्यवस्था प्रचलति, येन प्रत्येकं पदार्थः स्वकीयं मूलस्थानमवाप्नोति। एतस्मिन्नेवाधारे ऋतुचक्रम, वर्षचक्रम्, अहोरात्रचक्रम्, सौरचक्रम्, चान्द्रचक्रादिकञ्च विविधं चक्रं प्रतिर्तितं भवति। इदं प्राकृतिकं चक्रमेव पारिभाषिकशब्दावल्ल्यां यज्ञ इत्युच्यते। सोऽयं प्राकृतिको यज्ञः विश्वस्मिन् प्रतिक्षणं प्रचलति। यज्ञोऽयमस्य सृष्टिचक्रस्य नाभिरुक्तः। तद्यथा यजुर्वेदे-''**अयं यज्ञो भुवनस्य नाभिः**''[31] इति। गोपथब्राह्मणे वर्णितमस्ति। यदृतुसन्धावेव व्याधि र्जायते, तस्मद्व्याधिशान्तये यज्ञोऽपि ऋतुसन्धावेव क्रियते। यथा-''**भैषज्ययज्ञा वा एते, ऋतुसन्धिषु प्रयुज्यन्ते, ऋतुसन्धिषु वै व्याधिर्जायते**''[32] इति। **यज्ञेषु प्रयुक्तानि द्रव्याणि**-यज्ञेषु समिधा, घृतम्, हव्यसामग्र्यः, स्थालीपाकादयश्च प्रयुज्यन्ते।

(क) **समिधा**-समिधानिमित्तं तादृशानां वृक्षाणां चयनं कृतमस्ति, येभ्यः कार्बन-डाई-ऑक्साइड इत्यस्य गैसपदार्थस्य मात्राऽत्यल्पतया निकसति, तथा च ताः समिधाः शीघ्रमेव भस्मसात् भवन्ति। तादृशेषु वृक्षेषु आम्र-पलाश-बिल्व-उदुम्बर-शमी-वट-खदिरादयः प्रशस्त सन्ति। अन्ये दृढवृक्षाः निषिद्धाः सन्ति।

(ख) **घृतम्** - सर्वघृतेषु गोघृतं सर्वोत्तमं मन्यते। घृतं हि यज्ञस्य प्रधानतमं द्रव्यम्। यज्ञेषु घृतस्य प्रयोगः वायुप्रदूषणं नाशयति।

(ग) **हवनसामग्र्यः**- यज्ञेषु प्रयुज्यमाणाः हव्यामग्र्यश्चतुर्विधाः भवन्ति-सुगन्धितः, पुष्टिकारकः, रोगनाशकः, मिष्टपदार्थश्च। (1) **सुगन्धितः**-कस्तूरी-केसर-अगर-तगर-चन्दन-जायफल -जावित्री-लवङ्ग-एलादयश्च। एते अग्नौ गत्वा सुगन्धितं वायुं प्रदाय वायुमण्डलं शोधयन्ति। **( 2 ) पुष्टिकारकः**- पुष्टिकारकेषु तत्त्वेषु घृतातिरिक्ताः दुग्ध-फल-मूल-कन्द-गोधूम-तण्डुल-मष-तिलादयश्चागच्छन्ति। एते पदार्थाः यज्ञे प्रयुक्ताः सन्तः जीवमात्रस्य शरीरमुपचिन्वन्ति, हृष्ट-पुष्टं च कुर्वन्तीति। **( 3 ) रोगनाशकः**-सोमलता-गुडुची-गुग्गल-अपामार्गादय औषधयः यज्ञे प्रयुक्ताः सन्तः सर्वविधरोगान् विनाशयन्ति। तस्माद्यज्ञचिकित्सायां पृथक्-पृथग्रोगेभ्यः पृथक्-पृथगौषधीनां प्रयागो विहितोऽस्ति। **( 4 ) मिष्टपदार्थः**- मिष्टपदार्थाः यथा-गुड़-शक्कर-सिता-द्राक्षादाडिमनारङ्गाऽऽदीनि फलानि च यज्ञेषु प्रयुज्यन्ते। एषु पदार्थेषु वायुमण्डलस्य शोधनार्थमसाधारणशक्तिर्भवति।

**( घ ) स्थालीपाकः**-विशेषाहुतिभ्यः स्थालीपाकस्योपयोगी भवति। स्थालीपाके मोदक-पायस-मोहनभोग-हलुआ-अपूपादयश्च प्रयुक्ताः भवन्ति। एते पदार्थाः रोगनाशकाः सन्तः वायुशोधनेऽपि समर्थाः भवन्ति। अत एतेषां पदार्थानामुपयोगेन प्रकृतेः सन्तुलनम् पर्यावरणस्य शोधनम्, विविधाधिव्याधिविनाशः, सर्वविधशान्तिश्च सम्भवति। तस्मात्सर्वविधप्रयत्नेनास्माभिः यज्ञानुष्ठानादिभिः पर्यावरणस्य संरक्षणं विधातव्यामिति शम्। इत्यलमतिविस्तरेण।


1. मनुस्मृतौ-2/7 2. तै.ब्रा.-3/10/11/3
3. अमरकोशे-धीवर्गे श्लोक-6 4. गोपथब्राह्मणे-2/3/7
5. ऐ.आ.-1/3/8. 6. शब्दकल्पद्रुमे-182 तमे पृष्ठे
7. अथर्वसंहितायाम्-18/1/17 8. शु.य.सं.-4/2
9. अथर्ववेदे-12/1/12 10. अथर्ववेदे - 4/25/3
11. अथर्ववेदे-4/13/3 12. ऋग्वेदे-10/186/3
13. अथर्ववेदे- 3/21/10 14. ऋग्वेदे-1/23/20
15. ऋग्वेदे-1/23/19 16. अथर्ववेदे-3/7/5
17. यजुर्वेदे-17/41 18. ऋग्वेदे-5/42/11
19. यजुर्वेदे- 6/22 20. यजुर्वेदे-14/8
21. अथर्ववेदे-12/3/15 22. ऐतरेयब्रा0-2/4
23. श0प0ब्रा0-2/2/4/5 24. श0प0ब्रा0-6/1/3/12
25. यजुर्वेदे-13/17/-19 26. यजुर्वेदे-2/10-11
27. अथर्ववेदे-6/120/2 28. यजुर्वेदे-36/17
29. ऋग्वेदे-3/52/4 30. अथर्ववेदे-8-2-25
31. यजुर्वेदे-23/62 32. गोपथब्रा0उत्तरार्धे-1/19



G.C. ENTERPRISES
GOVT. CONTRACTOR
Prop. TARLOK PAPNEJA
SPECIALIST IN WATER TREATMENT
C-3/153, Yamuna Vihar, Delhi - 53
Phone : 22911281, 22919451

Girish Kumar Bansal, Manager
Vidya Deep Public School
(Govt. Recognised)
C-400/A, Main Market
Bhajan Pura, Delhi-110053
Mob.: +91-9555955591
+91-9810067099,+011-22563764





प्रथमपुटस्य शेषभागः

## बौद्ध विचारधारायाः हिन्दूत्व-वैरुध्य....



संगोष्ठ्यामस्यां प्रो. भूदेव शर्मा प्रो. लल्लन प्रसाद, प्रो. एस.पी. नारंग, डॉ.आर.एस.कौशल, डॉ. चाँद भारद्वाज, श्री विद्यासागर, डॉ.वाई.वेट सी. रोजर, प्रो. शशि तिवारी, श्री वाई.के.बाधवाः च स्व-स्व विचारान् प्रकटी कृतवन्तः। अन्ते श्री आई.डी. कन्सल महोदयो आगतेभ्य अतिथिभ्यः धन्यवादं सापनं कृतम्।

चर्तुथपुटस्य शेषभागः

## पुराणेषु राष्ट्रचिन्तनम्

मातृभूमिपदवीमलङ्करोति।

या सा भगवती नित्या सच्चिदानन्दरूपिणी।
परात्परतरा देवी यया व्याप्तमिदं जगत्।। 19

राष्ट्रचिन्तनस्य चरमोत्कर्षोह्यतिशयोक्तिपूर्णवाक्ये सम्प्राप्यते। भारतभूमावस्यां पुण्यसंचयैरेव सहस्त्रस्य जन्मनां परं प्राणी इह पुण्यभूमौ जन्म लभते। यथोक्तं विष्णुपुराणे-

अत्र जन्मसहस्त्राणां सहस्त्रैरपि सत्तम।
कदाचिल्लयते जन्तुर्मानुष्यं पुण्यसञ्चयात् ।। 20

एवं पदे पदे पुराणेषु पर्वतारण्यनदीद्वीपप्रान्तानां वर्णनं विस्तरेण उपलभ्यते। भारतं पुण्यभूमिर्मता शास्त्रकारैः। शारीरिकभौतिकोन्नत्युपरि आध्यात्मिकोन्नतिप्राप्तेराधारभूमिः भारतभूमिरेव। भारतं प्रति उदात्तराष्ट्रियभावनां जागरयितुं पुराणेषु विहितचिन्तनं लोकोपकारि प्रेरणास्पदञ्च विद्यते। पुराणेषु भारतवर्षस्य राष्ट्रचिन्तनविषयकी प्रकृष्टपुण्यप्रशस्तिर्विहिता वर्तते। ये आधुनिकलौकिक- ज्ञानमदोन्मत्ता भारतवर्षस्य प्राचीनसाहित्योपरि देशप्रेम्णोह्यभावमारोपयन्ति ते पुराणनिहितभारत- राष्ट्रप्रशस्तिमनुशीलयेयुः। पुराणेषु राष्ट्रचिन्तनं इतीदं शीर्षकमवलम्ब्य यद्यपि विद्यावारिध्युपाधये एकः शोधप्रबन्धो विलेखितुं शक्यते तथापि शोधपत्रे मया समासेन राष्ट्रचिन्तनमनुशीलितमस्ति ।

सन्दर्भान्विता सूची


[1]अमरकोशः,शब्दादिवर्गः 7।
[2] देवीभागवतम्- 1-3 ।।
[3] नारदीयपुराणम् , 2,24,1 ।
[4] ऋवेदः, म.10, सू.273, मन्त्रः-5, म.4, सू.42,मन्त्रः-1, म.5,सू.66, मन्त्रः-9 ।
[5] विष्णुपुराणम् , 2/3/25
[6] श्रीमद्भागवतम् , 5/19/23
[7] श्रीमद्भागवतम् , 4/19/2
[8] विष्णुपुराणम् , 2/2/26
[9] विष्णुपुराणम् , 2/3/5
[10] मत्स्यपुराणम् , 114/10
[11] विष्णुपुराणम् , 2/3/1-2
[12] विष्णुपुराणम् , 2/3/25
[13] ब्रह्मपुराणम् , 27/2
[14] ब्रह्मपुराणम् , 70/21 [15] ब्रह्मपुराणम् , 70/24
[16] विष्णुपुराणम् , 2/3/2 [17] मार्कण्डेयपुराणम् , 56/21-22
[18] मार्कण्डेयपुराणम् , 57/62 [19] देवीभागवतम् , 1/2/36
[20] विष्णुपुराणम् , 2/3/23



**पाठकानां कृते सूचनाः-**
कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-
**Sanskrit samvad,**
Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar, Delhi-110053
IFC Code- IOBA0002249

# ''संस्कृत-भवितव्यम्'' इति साप्ताहिक-संस्कृतपत्रिकायाः डॉ.वीणागानु -महाभागायाः प्रश्नान् उत्तरति- बळदेवानन्द-सागरः ...!

1) कदाप्रभृति भवान् संस्कृतसंबद्धः?

उत्तरम्- बाल्यकालादेव । कुटुम्ब-संस्काराः, अपि च प्राक्तन-जन्मसंस्काराः अत्र संयोजकाः इत्यपि वक्तुं शक्यते।

2) भवतः संस्कृतशिक्षणं कथम् अभवत् ? पारम्परिकरीत्या उत आधुनिकपद्धत्या ?

उत्तरम्- कुलगुरूणां स्वामिनां त्यागमूर्तिरूपाणां श्रीशिवोऽहं-सागरचरणानाम् अनुग्रहेण कृतोपनयन-संस्कारः तैः संस्कृताध्ययनार्थं काशीं प्रति प्रेषितः। तत्र श्रीदक्षिणामूर्ति-संस्कृत-महाविद्यालये स्थित्वा पारम्परिकरीत्या डॉ.सम्पूर्णानन्द-संस्कृतविश्वविद्यालयात् शास्त्रि-परीक्षा उत्तीर्णा, अनन्तरं दिल्लीविश्व-विद्यालयात् स्नातकोत्तरपरीक्षा, एम्.फिल्.-परीक्षा च उत्तीर्णे । नवदेहल्याः श्रीला.ब.शा.रा.संस्कृतविश्वविद्यालयात् पी.एच.डी. (विद्यावारिधिः) उपाधिः अधिगतः। आरम्भे गुजरातराज्ये भावनगरजनपदे चमारडीग्रामे गृहीतजन्मा पंचमीकक्षां यावत् जन्मग्रामे, सप्तमीं कक्षां यावच्च वल्लभीपुरे आधुनिक- रीत्या शिक्षाम् अवाप्नोत्।



3) पत्रकारिताक्षेत्रे को भवतः गुरुपदम् अधितिष्ठति ?

उत्तरम्- परमार्थेन आकाशवाणी अनन्तरं च, दूरदर्शनम् । काश्याम् अध्ययनावसरे ''गाण्डीवम्'', ''गीताधर्म''-प्रभृतिपत्रिकासु कविताः, कथाः, विविधा: लेखाः च लिखित्वा प्रकाशिताः। ''वेदान्तपरिभाषा'', ''द्वादशोपनिषदः'', ''शिवमहिम्नः स्तोत्रम्'' चेति पुस्तकानि सम्पादितानि, परञ्च, आकाशवाण्याः संस्कृतवार्ताप्रसारणं हि, यदाप्रभृति (30 जून'1974-तः) जीवनं जीवनवृत्तिः च संजाते. शनैः शनैः संस्कृत-पत्रकारिता- विषयिणी रुचिः प्रवर्धिता। साम्प्रतं ''व्यास'' इति दृश्यवाहिनीतः संस्कृत- पत्रकारिताविषयकाणि सप्तव्याख्यानानि प्रसारितानि सन्ति, तानि ''यूट्यूब'' इत्यत्र द्रष्टुं शक्यते। संस्कृत-पत्रकारिताविषयकं पुस्तकं संस्कृत-भाषायां विरचितम्, तच्च प्रथमं ''शारदाया'' प्रकाशितम्, अनन्तरं ''संस्कृत-भारत्या'' प्राकाश्यमानीतम्। विश्वपुस्तक- मेलावसरे (2010) बंगलूरुनगरे प्राक्तनेन निर्वाचनायुक्तेन एन.गोपालस्वामिवर्येण लोकाय अर्पितं च ।

4) प्रसारमाध्यमेषु संस्कृतस्य कीदृशः प्रभावः ?

उत्तरम्- नातिचिरं (10-11 दिसम्बर'2015) दिल्ल्यां सम्पन्नायां पंचम्यां संस्कृतपत्रकार- संगोष्ठ्यां समुपस्थापितैः शोधपत्रैः पी.पी.टी.प्रदर्शनैः च सर्वैः प्रतिनिधिभिः सहभागिभिः च दृष्टं श्रुतं च यत् सामाजिक-संचारमाध्यमेषु दिनानुदिनं संस्कृतस्य प्रयोगः विवर्धत एव ।

5) संस्कृते प्रसारमाध्यमानां कीदृशः प्रभावः?

उत्तरम्- सुष्ठु जिज्ञासितम्। सामाजिक-संचारमाध्यमेषु दिनानुदिनं संस्कृतस्य प्रयोगः विवर्धते इति कृत्वा संस्कृतानुरागिणः संस्कृताभिमानिनः च प्रसारमाध्यमेभ्यः साहाय्यम् आददति। उपकृताः भवन्ति। सूचना-प्रविधि-क्रान्तिकारणात् संस्कृतं साम्प्रतम् अधिकतरं संजातम्। प्रसारमाध्यमानां कारणात् संस्कृते इतोऽपि अधिकतरः प्रभावः भविष्यति काले दरीद्रक्ष्यते।

6) प्रथमतया यदा भवान् दिल्लीतः वार्ताः श्रावितवान् तद्विषये किंचित् वदतु।

उत्तरम्- अविस्मरणीयोऽयम् अनुभवः। ईश्वरकृपया पित्रोः आशिर्वादिभिः गुरोः अनुग्रहेण च अवसरोऽयं लब्धः आसीत्। एतदपि अनुभूतं यत् आकाशवाणी-माध्यमेन बळदेवानन्द-नामायं वराकः संस्कृत-सेवकः च, अशेषजगति ख्यातिम् अवाप्स्यति अतः संस्कृतेति परमदेवता: समधिकावधानेन सततं समाराधनीया: इत्यनारतम् अनुभूयते स्म।

7) 'प्रवाचकः बलदेवानंदसागरः'-इति चिरपरिचितानि अक्षराणि खलु। एतादृशे प्रदीर्घे कालखण्डे स्यात् कश्चित् अविस्मरणीयः प्रसंगः येन अस्मादृशानां चित्तानि अपि आनंदम् अनुभवेयुः। कृपया विवृणोतु भवान्।

उत्तरम्- कालक्रमेण एतानि त्रयोदशाक्षराणि मम अभिज्ञानरूपाणि जातानि। तेषु दिनेषु दृश्यवाहिनीनाम् एतादृशं बाहुल्यं नासीत् इति कृत्वा जनाः आधिक्येन श्राव्यप्रसारणानि शृण्वन्ति स्म। बाढम् - विगत.एकचत्वारिन्शत्.वर्षाणि यावत् आकाशवाणी.दूरदर्शनयोः कार्यानुष्ठानस्य अवधौ घटिता: तादृशाः अनेके अविस्मरणीयाः प्रसङ्गाः वर्तन्ते - तेषु अन्यतमं वर्णयामि - भारतस्य राष्ट्रपतिं महामहिमशालिनं डा.शङ्कर.दयाल.शर्माणं मेलितुम् एकं संस्कृताभिमानिनां प्रतिनिधि.मण्डलं राष्ट्रपति.भवनं प्रयातमासीत् - राष्ट्रपतिना साकं व्यक्तिशः परिचयावसरे अन्यतमेन संस्कृत.विदुषा डा. गौतमभाई.पटेलेन यदा प्रोक्तं यत् एष अस्ति बलदेवानन्दः झटिति एव राष्ट्रपतिमहोदयः न्यगादीत् यत्-इयम् आकाशवाणी सम्प्रति वार्ता: श्रूयन्ताम् अहम् अस्मि प्रवाचकः. बलदेवानन्द.सागरः एवं हि भारतस्य प्रथम.नागरिकस्य मुखारविन्दात् इमानि वचांसि श्रुत्वा आत्मनः धन्यताम् अन्वभवम् -

8) ''श्री-अप्पाशास्त्रि-राशिवडेकरः'' इत्यस्य विषये भवान् किं वदिष्यति ?

उत्तरम्- एते अस्माकं प्रेरणास्पदीभूताः। संस्कृत-पत्रकारिताक्षेत्रे श्री-अप्पाशास्त्रि-राशिवडेकरमहोदयानां योगदानम् अप्रतिमं वर्तते। एतेषां स्मृतौ अयमेव समुचितः श्रद्धांजलिः भविता यत् वयं सर्वे संस्कृतानुरागिणः संभूय संस्कृतपत्रकारिता-कार्याणि आचरेम।

9) वृत्तांकने स्वातंत्र्यम् परिवर्तनस्य आवश्यकता शुद्धताविचारः च इत्येतस्मिन् विषये भवतः विचारधारां ज्ञातुम् उत्सुकाः वयम्।

उत्तरम्- पत्रकारिता नाम लोकतन्त्रस्य सुदृढः चतुर्थः स्तम्भः। अतः वृत्तांकने स्वातन्त्र्यं नूनं स्यात्। वयं जानीमः यत् समाजे सर्वदा समुचितं रचनात्मकं वा नैव घटते अतः वृत्त-परिवर्तनं तु नैव, परञ्च वृत्तपरिष्कारः (आधिक्येन रचनात्मकवृत्तप्रकाशनम्) भवेत् इति मे मतिः। एतदर्थं युव-पत्रकाराः प्रशिक्षणीयाः सन्ति। संस्कृत-पत्रकारिताक्षेत्रे भाषायाः शुद्धताविचारः परमावश्यकः। केचन समुत्साहिनः संस्कृत-पत्रं पत्रिकां वा आरभन्ते परंच तत्र शब्दानुशासनं नैवानुसरन्ति चेत् भाविप्रजानां कृते नैतत् हितावहं सेत्स्यति।

10) श्राव्यमाध्यमं दृक्माध्यमं च इत्येतयोः विषये किंचित् स्पष्टीकरोतु भवान् !

उत्तरम्- एतत् माध्यम-द्वयमपि प्रभावि वर्तते। श्राव्यमाध्यमे केवलं श्रवणेन्द्रियं सक्रियं भवति। दृक्माध्यमे दृक्- श्रवणेति-इन्द्रियद्वयं कार्यरतं भवति, अत एव कश्चन सुदीर्घकालं यावत् दृश्यमाध्यमम् अवलोकयति चेत्, क्लान्तः भवति । श्राव्यमाध्यमेन एतादृशी क्लान्तिः नैवानुभूयते। अपि च, दृक्माध्यमेन सर्वाणि वस्तूनि वार्णिकानि जीवन्तीव प्रतीयन्ते अतः एतत् समधिकम् आकर्षकम् इति तु निश्चप्रचम्। परन्तु अत्र प्रविधि-(टेक्नोलोजी)-वैभिन्यं वर्तते। श्राव्यमाध्यमं सापेक्षतया सरलं, दृक्माध्यमं च किन्चित् जटिलं वर्तते।

11) अग्रिमजीवने भवतः के के संस्कृतविषयकाः संकल्पाः? योजनाः वा?

उत्तरम्- वर्षत्रय-पूर्वम्, महाकालनगर्याम् उज्जयिन्यां कालिदास-अकादम्याः निदेशक-दायित्वस्य निर्वहणावसरे मया काश्चन संस्कृत-योजनाः प्रारूपिताः आसन्, तासां योजनानां प्रारूप-प्रस्तावाः मध्यप्रदेश-शासनस्य संस्कृति-मन्त्रिणे संस्कृति- सचिवाय च प्रदत्ताः सन्ति। तेषु प्रस्तावेषु संस्कृत-एफ-एम-रेडियो-प्रवर्तनम् वा संस्कृत-कम्यूनिटी-रेडियो-प्रवर्तनम् अन्यतमं वर्तते। युगपदेव संस्कृत-पत्रकारिता- सम्बद्धानि कानिचित् कार्याणि अभिलक्ष्य संस्कृतानुरागिणां यूनां प्रशिक्षणात्मकाः संकल्पाः अवशिष्यन्ते।

12) भवन्मतेन संस्कृतस्य भवितव्यं कीदृशम्? किं च अस्मादृशानां दायित्वम्?

उत्तरम्- संस्कृतस्य भवितव्यं रचनात्मकम् उज्ज्वलं च परिभावयामि। पूर्वं नैतादृशः सौविध्यान्वितः परिवेशः आसीत् । उदाहरणार्थम् अत्र ''प्राचीप्रज्ञा''-इति मासिकीं ई-संस्कृतपत्रिकां, ''सम्प्रतिवार्ताः'' इति दैनिकम् ई-संस्कृतवार्तापत्रं च उद्धरामि। कदाचित् राजस्थानविश्वविद्यालयस्य संस्कृतविभागेन आयोजिते पुनश्चर्या-कार्यक्रमे समवेतान् प्राध्यापक-व्याख्यातृन् सम्बोधयन् अहम् उक्तवान् यत् साम्प्रतिके काले ई-संस्कृतपत्रिका-इति वैद्युताणविक-पत्रिकाप्रकाशनं नास्ति कठिनमिति... । यः कश्चन संस्कृत-पत्रकारः एतद्विषयिणीम् अनुज्ञाम् आदाय ई-संस्कृतपत्रिकाम् आरब्धुं शक्नोति। एतानि वचांसि आधृत्य ''प्राचीप्रज्ञा''-इति मासिकी ई-संस्कृतपत्रिका आरब्धास्ति।

साम्प्रतम् अस्मादृशानाम् इदमेव दायित्वं यत् स्व-स्व-क्षेत्रेषु संस्कृत-कार्याणि कुर्वन्तः अपि राष्ट्रियस्तरे संभूय सामाजिक-संचारमाध्यमेषु संस्कृतप्रयोगार्थं प्रयतेम। एतदर्थं ''भारतीय-संस्कृत-पत्रकार-संघः'' पूर्वतः एव कार्यनिरतः अस्ति ।

13) संस्कृतं स्वीकृत्य ये प्रसारमाध्यमेषु पदं कुर्वन्ति वा कर्तुम् उत्सुकाः तेषां कृते कः भवतः सन्देशः?

उत्तरम्- तेषां सर्वेषां स्वागतं ये नाम संस्कृतं स्वीकृत्य प्रसारमाध्यमेषु पदं कुर्वन्ति वा कर्तुम् उत्सुकाः सन्ति। साम्प्रतम् अनेकविधानि सन्ति प्रसारमाध्यमानि। एतदर्थं तैः संस्कृतभाषायाः प्रावीण्यपुरस्सरं संचारमाध्यमानां प्रशिक्षणमपि अनुष्ठेयम्, अपि च, अनुवादकला अभ्यसनीयास्ति।

14) प्रसारमाध्यमानि अर्थार्जनमाध्यमानि भवितुम् अर्हन्ति वा?

उत्तरम्- नूनं प्रसारमाध्यमानि अर्थार्जनमाध्यमानि भवितुम् अर्हन्ति। संस्कृतज्ञाः साम्प्रतम् एतदर्थं सन्नद्धाः भवेयुः। यद्यपि संस्कृत-सेवाव्रतिनः धनार्जनं जीवन-लक्ष्यत्वेन नैव स्वीकुर्वन्ति, तथापि सारल्येन आजीविका-निर्वहणं स्यात् इत्येतदर्थम्, अपि च, व्यवहारकार्याणि तु अर्थेन एव सिद्ध्यन्ति इतिकृत्वा साम्प्रतं संस्कृतस्य कार्यैः प्रसारमाध्यमेषु नूनम् अर्थोपार्जनं शक्यमस्ति- इति शम्....!

## न मारय पितर्मां त्वदीया सुताहम्

अवध्यां दयालो शुभां मातृकुक्षौ
अदेहमजां मां सुतां पुत्रभिक्षो
इमां पिण्डरूपामजातां प्रपश्यन् ।
न मारय पितर्मां त्वदीया सुताहम्। 1

अहो मत्पितर्दर्श्यसे लोकभीतः।
यतो कोमलांगीं निहन्तुं प्रवृत्तः।
त्यजैतत् कुकृत्यं जघन्यं विनिन्द्यं
न मारय पितर्मां त्वदीया सुताहम्। 2

क्व याचे धनानि पटं भूषणानि।
क्व भाषे वचांसीह विपरीतकानि।
अये वज्रहृत्वं भवेः वीतचिन्तः
न मारय पितर्मां त्वदीया सुताहम्। 3

कराले कलौ सन्ति दैत्या असंख्या।
भ्रमन्तो यतः कन्यकास्ते सुरक्ष्याः।
बिभेषीव हा हन्त दुष्ट्वा पितस्त्वं
न मारय पितर्मां त्वदीया सुताहम्। 4

चलापांगनेत्रा निरीहानवद्या
मृगी सिंहदेशागतेवाद्य हृद्या
यदा दानवैर्भक्ष्यते हन्त नित्यं
न मारय पितर्मां त्वदीया सुताहम्। 5

खलं यौतुकं वर्धते नो विशालम्
धनं सम्पदो लोकमानं कुचालम्
यतो हन्यते पुत्रिकारत्नमेवम्
न मारय पितर्मां त्वदीया सुताहम्। 6

**डॉ अरविन्दकुमारतिवारी**
**आदर्शवैदिकविद्यालयइण्टरकालेज,**
**नंगला-सिनौली बागपतम् उत्तरप्रदेशः**
arvindt490@gmail.com

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
**खादी वस्त्रों का विशाल भण्डार**
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (रिल्ड)
✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
**खादी ग्रामोद्योग भवन**
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोन:-0120-2631855, 9899334204

# लघुमध्यमयोः समाचारपत्रयोः अहितं न भवेत्-कपिलमिश्रः

नवदेहली। क्षेत्रीयस्तरे प्रकाशमानाः लघु-मध्यम्-पत्र-पत्रिकाः वास्तविक -रूपे देशव्यवस्था चालयितुं सहायकाः भवन्ति। सामाजिक्यः कुरीत्यः अपसारियतुं आसां निर्णायिकी भूमिका वर्तते।









देहल्यां ईद्रशानां समाचारपत्र-पत्रिकादीनां संरक्षणार्थम् सर्वकारैः प्रत्येकः सम्भवः प्रयासः करिष्यते। उपर्युक्तं विचारं दिल्ली-सर्वकास्य पर्यटन-कला-संस्कृति-भाषा-केबिनेट-मन्त्रि श्री-कपिलमिश्रः व्यक्तमकरोत्। श्रीकपिलमिश्रः पूर्वीदिल्ली यमुनाविहार-क्षेत्रे आयोजिते 'दिल्ली मिडिया एसोसिएशन' इत्येतस्य मासिक-गोष्ठ्यां मुख्यातिथिरूपेण भाष्यमाणः कथितं यत् देहल्यां लघु-एवं मध्यमं समाचारपत्राणां प्रसारं तु प्रक्षेत्रं वीथिम् च सामान्यं जनं पर्यन्तम् अस्ति। समाजिकोत्थाने ऐतेषां महती भूमिका वर्तते। अतः ऐतेषां समाचारपत्राणां संरक्षणार्थम् वर्धनार्थम् च अन्यराज्यसद्रशां-नीतिं कल्पयिष्यते एतदर्थम् ते अधिकारीन् उक्तवन्तः यत् भवन्तः अन्य-राज्य-समाचारणां नियमावलीन् अनुशील्य देहलीसर्वकाराय नीतिनिधरिणे दद्युः। अध्यक्षः श्री वेदशर्मावर्यः यदा मन्त्रिमहोदयस्य ध्यानं दिल्ली देहलीसर्वकारस्य श्रमविभागेन मजीठिया-आयोगस्य नाम्नि लघुसमाचारपत्राणां उत्पीडनं प्रति कारितवान् तदा श्रीमिश्रः वदति यत् अहम् अस्मिन् सम्बन्धे लघुसमाचारपत्रैः सहैवस्मि। वास्तविके लघु-समाचारपत्राणि उद्देश्याय प्रकाशते तेषां किमपि व्यापारिकमुद्देश्यः न भवति। अस्मिन् अवसरे श्रीवेदप्रकाशशर्मावर्यः देहली-केन्द्रसर्वकारयोः पक्षपातपूर्ण व्यवहारस्य आरोपं कृतवान यत्, ''कारपोरेट मीडिया' इत्येतस्य प्रभावेन लघुसमाचारपत्राणि प्रति उदासीनः व्यवहारः क्रियते।

श्रीशर्मा उक्तवान देहलीसर्वकारः राष्ट्रियपर्वेषु च महात्मागाँधीवर्यस्य पुण्यतिथौ लघुसमाचारपत्रेभ्य विज्ञापनं न दत्तवान्।

देहली-सूचनाप्रसार-मन्त्रालयेन यत्र लघु-समाचार-पत्राणि गतपञ्चदशवर्षेभ्यः विभिन्नेषु अवसरेषु आवर्षं 12-15 विज्ञापनानि दत्तानि गते वर्षे तेषां संख्या शून्ययमेव अभवत्।

एसोसिएशन-महासचिवः श्री हिमांशुपात्रा उक्तवान दिल्ली सर्वकारैः नूतनाभिःयोजनाभिः परिवर्तनस्यारभं कृतम्।

## थाईराजकुमार्यै सिरिंधोर्नायै प्रथमसंस्कृतविश्वपुरस्कारप्रदानघोषणा-

उपराष्ट्रपतिः हामिद-अंसारी थाईलैण्डस्य राजकुमारीं महाचक्रीसिरोधोर्नममिलत्। यस्यै प्रथमं विश्वसंस्कृतपुरस्कारप्रदानाय सर्वकारेण निर्णयो विहितोऽस्ति। संस्कृतस्य विदुषी षष्टिवर्षीया सिरिधोर्नः विगतवर्षे सुसम्पन्नसंस्कृतसम्मेलने संरक्षिकासीत्। विदेशमन्त्रालयस्य सचिवेन अनिलबाधवेन ज्ञापितं यत् सिरिधोर्नः पुरस्कारग्रहणाय भारतमागमिष्यति। अंसारिणा साकं थाईलैण्डयात्राकाले गतः बाधवः अवादीत्-'राजकुमारी सिरिधोर्नः प्रथमविश्वसंस्कृतपुरस्कारप्राप्तये भारतमायास्यति। स्वदेशगमनात् प्राक् अंसारी राजकुमारीं सिरिधोर्नं प्रातः सापाथुमपैलेसे अमिलत्।



तत्रत्यचित्रालदापरियोजनायाः निरीक्षणमपि तेन कृतम्। बाधवेन निगदितं यत् थाईलेण्डस्य प्रधानमन्त्री अस्मिन् वर्षे भारते आमन्त्रितः। अस्माभिः राजकुमारः महावीरा लांगमोर्नः अपि परस्परसहमत्या भारतयात्रायै आमन्त्रितः अत्तिथिषु।

तस्य स्वागतं उपराष्ट्रपतिः विधास्यति। तेनोक्तं आशास्महे वयं रक्षामन्त्रिणो निमन्त्रणे उपप्रधानमन्त्रिरक्षामन्त्रिणोः भारतयात्राम्। इयं चतुर्थी यात्रा विगतपंचवर्षेषु। विहितसम्मेलने षष्टिदेशेभ्यः संस्कृतस्य षट्शताधिकाः विद्वांसो भागमगृह्णन्। उद्घाटनमस्य विदेशमन्त्रिसुषमास्वराजेन कृतमासीत्। बाधवेन षोडशविश्वसंस्कृतसम्मेलनस्य सफलायोजनाय थाईलैण्डस्य प्रशंसा कृता।

## २०१४वर्षस्य राष्ट्रपतिसम्मानप्राप्तकर्तृणां संक्षिप्तपरिचयः ( १२ )

# ''पद्मश्री'' प्रो. ओम् प्रकाशउपाध्याय



''पद्मश्री'' प्रो. ओम्-प्रकाश-उपाध्यायवर्यस्य जन्मः मेवाङ-अञ्चलस्य ग्राम-माण्डले जिला-भीलवाड़ा-राजस्थाने परम्भागवत-पिता स्व. श्री हरि शंकरवर्यः उपाध्यायः च माता स्व. श्रीमति उगमीदेवी इत्येतयोः ग्रहे दिनाङ्के **2** जूनः 1951 इत्यस्मिन वर्षे अभूत भवन्तः प्राथमिकी शिक्षा ग्रामैव सम्पाद्यय नव-कक्षा-आरभ्य शास्त्रीकक्षापर्यन्तं राजकीय-महाराणा-महाविद्यालयः उदयपुरे अध्ययनं अकुर्वन्। भवते ''प्रवेशिका'' परीक्षायां राजस्थाने द्वितीयंस्थानं प्राप्तेः फलस्वरूपः माध्यमिक-शिक्षा-मण्डल-बोर्ड इति संस्था अजमेर द्वारा ''रजतपदक'' एवञ्च ''उपाध्याय'' परीक्षायां प्रथमं प्राप्ते फलस्वरूपः 'स्वर्णपदकं' प्रदत्तं। महाराणा-भोपाल-महाविद्यालयः उदयपुरात् एम.ए. (संस्कृत) परीक्षा एवं राजकीय मदनमोहन-आयुर्वेद-महाविद्यालयः उदयपुरात् आयुर्वेदाचार्य परीक्षा-उत्तीर्णा भवता कृता। भवन्तः राजस्थान-विश्वविद्यालय-जयपुरात् प्रथमश्रेण्यां व्याकरणाचार्यः ''दर्शनाचार्यः'' तथा एम्.डी (आयुर्वेदः) च पीएच.डी (आयुर्वेदः) उपाधयः प्राप्तवन्तः। चिकित्सा-क्षेत्रस्य विशिष्टाः। योग्यताश्च उल्लेखनीय-योगदान-फलस्वरूपात् महामहिम-राष्ट्रपतिना 2014 ईसवीये भवन्तं राष्ट्रोच्चनागरिक सम्मानेन सम्मान्तिाः कृतवन्तः।

भवन्तः प्राध्यापक-रूपेण उदयपुरस्थ मदनमोहनमालवीय आयुर्वेद महाविद्यालये अध्यापनं कार्य आरंभं कृतवान् पञ्चवर्षाणि यावत् चिकित्साधिकारी अभूत तदनन्तरं राष्ट्रिय-आयुर्वेद संस्थान-जयपुरे सहा. प्राध्यापकः एसो.प्राध्यापकः एवं प्राध्यापकः रूपेण पदमलङ्कुर्वन्। जून-2011 ईसवीये सेवानिवृत्तो भूत्वा वर्तमाने भवान् गुरूरविदास-आयुर्वेदविश्वविद्यालयपञ्जाबे कुलपतिपदम् पदमलङ्कुर्वन्तः सन्ति पदेऽस्मिन् भवतां द्वितीय सेवाकालः।

पत्रसंकेतः
कुलपतिः
गुरु रविदास आयुर्वेद विश्वविद्यालय
जोधामल मार्ग, होशियारपुर पंजबा, 145001

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- संदीपउपाध्याय, सन्नीकुमार, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।